[1]वृद्धिः खल्वपि – अकार्षीत् । [2]अहार्षीत् । अचैषीत् । अनैषीत् । अलावीत् । अस्तावीत् ।

[3]गुणवृद्धी स्वसञ्ज्ञया [4]विधीयेते, तत्र इकः इति [5]एतदुपस्थितं द्रष्टव्यम् । किं कृतं भवति ? द्वितीयया षष्ठी प्रादुर्भाव्यते (म. भा. १. ४६) । मिदिमृजिपुगन्तलघूपधर्च्छिदृशिक्षिप्रक्षुद्रेष्वङ्गेन इग् विशेष्यते (म. भा. १. ४४) । जुसि[6] सार्वधातुकादिगुणेषु इकाङ्गं विशेष्यते । [7]मेद्यते । अबिभयुः ।

इकः इति किम् ? आत्सन्ध्यक्षरव्यञ्जनानां मा भूत् ( म. भा. १. ४२ ) । यानम्[8] । ग्लायति । उम्भिता[9] । पुनर्गुणवृद्धिग्रहणं [10]स्वसञ्ज्ञया विधाने नियमार्थम् । इह मा भूत् – द्यौः, [11]पन्थाः, [12]सः, इमम् इति (म. भा. १. ४३) ॥

## न धातुलोप आर्धधातुके । (४/२६५६)

धात्वेकदेशो धातुः, तस्य लोपो यस्मिन्नार्धधातुके[13] तदार्धधातुकं धातुलोपं, तत्र ये गुणवृद्धी प्राप्नुतः, ते न भवतः । लोलुवः । पोपुवः । मरीमृजः (म.भा. १.५१) । लोलूयादिभ्यो यङन्तेभ्यः पचाद्यचि (३.१.१३४/२८९६) विहिते 'यङोऽचि च'[14] (२. ४. ७४/२६५०) इति यङो लुकि कृते [15]तमेवाचमाश्रित्य ये गुणवृद्धी [16]प्राप्ते तयोः प्रतिषेधः ।

धातुग्रहणं किम् ? लूञ्[17] (धा.पा. १४८३) लविता । रेडसि[18] (वा. सं. ६. १८) । पर्णं न वेः[19] (ऋ. ४. ४०.३) । अनुबन्धप्रत्ययलोपे[20] मा भूत् । [21]रिषेर्हिंसार्थस्य (धा. पा. ६९४) [22]विच्प्रत्ययलोप उदाहरणं रेट् (वा. सं. ६. १८) इति । आर्धधातुके इति किम् ? 'त्रिधा बद्धो वृषभो रोरवीति' (ऋ. ४. ५८. ३) [23]इति । [24]सार्वधातुके मा भूत् । [25]इकः इत्येव – अभाजि, रागः । बहुव्रीहिसमाश्रयणं किम् ? क्नोपयति, प्रेद्धम् ॥

## क्ङिति च । (५/२२१७)

निमित्तसप्तम्येषा[26] । क्ङिन्निमित्ते ये गुणवृद्धी प्राप्नुतः, ते न भवतः (म. भा. १. ५३) । चितः, चितवान् । [27]स्तुतः, स्तुतवान् । भिन्नः, भिन्नवान् । मृष्टः, मृष्टवान् । ङिति खल्वपि-चिनुतः, चिन्वन्ति । मृष्टः, मृजन्ति । गकारोऽपि अत्र चर्त्वभूतो निर्दिश्यते । 'ग्लाजिस्थश्च ग्स्नुः' (३. २. १३९/३११९) जिष्णुः । भूष्णुः । इकः इत्येव - कामयते, लैगवायनः (म. भा. १. ५५) ।

[२.] मृजेरजादौ सङ्क्रमे विभाषा वृद्धिरिष्यते (म. भा. १.४८) ।

---

1. वृद्धः अ. 2. अहार्षीत्-अलावीत् नास्ति ब. क. ग. ह, अचैषीत् - विभयुः नास्ति ई. 3. यत्र ग. ह, गुणवृद्धी–अबिभयुः नास्ति अ. क. 4. स्वसंज्ञायाः शिष्येते फ. 5. एव ग. 6. अंगस्य इरिति जुसि सार्वधातुके ह्रस्वादिगुणेष्वेकाङ्गं फ. 7. मेद्यति ग. 8. मार्ष्टि, भोक्ता, चेता, कर्ता ग. 9. इति ग. 10. स्वसंज्ञायाः ई. 11. पन्थाः फ, पथाः ई. 12. स्य इयम् ग. 13. परतः ग. फ. 14. च नास्ति फ. 15. तम् नास्ति फ. 16. प्राप्नुतः ते न भवतः ग.फ.ह. 17. लूञ् विस्तारे ग. ह. 18. पूर्वपठितार्धवर्णं नयेत् ग.ह. 19. नयेः ग. सर्वेषु मुद्रितपुस्तकेषु, वर्णं भवेत् ब. 20. °लोपे-विच् नास्ति फ. 21. विषेः ह. 22. विच्-लोपे फ. 23. इति नास्ति ई. 24. वाक्यमिदं नास्ति ग. ह. 25. इकः इत्येव–क्नोपयति नास्ति ब. क. ह. 26. एषा नास्ति फ. 27. स्तुतः, स्तुतवान् नास्ति फ.